इत्यमरः ।१।१।८॥ (यथा, गीतगोविन्दे ।६।११।
"सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दी-
वरम् ॥"

स्वर्गवासिनि, त्रि । यथा, अथर्ववेदे ।१८।४।८०।
"स्वधा पितृभ्यो दिविषद्भ्यः ॥")

दिविष्ठः, त्रि, (दिवि स्वर्गे तिष्ठतीति । स्था+कः । अलुक् । "अम्बाम्बगोभूमीति ।" ८ । ३ । ९७ । इति षत्वम् ।) स्वर्गस्थः । इति संक्षिप्तसार ॥) (यथा, महाभारते ।३।१००।२४।
"ततो हतारिः सगणः सुखं वै
प्रशाधि कृत्स्नं त्रिदिवं दिविष्ठः ॥"
क्वचित् अलुक्त्वेऽपि दृश्यते । यथा, भागवते ।४।२३।२२।
"तस्या दिविस्थैर्दिवपालैः परीत
विवेश वह्निं ध्यायती भर्तृपादम् ॥")

दिवी, स्त्री, (दिव+इन् । कृदिकारादिति वा ङीप् ।) उपजिह्निकाकीटः । इति हारावली । १६० ॥

दिवोकाः, [स्] पुं, (द्यौः स्वर्ग आकाशो वा ओको यस्य ।) देवः । चातकः । इति मेदिनी । से, ५४ ॥ स्वर्गवासिनि, त्रि । यथा, महाभारते ।१।६६।६।
"सा तु विध्वस्तवपुषः कश्मलाभिहतान्नृप ! ।
ददर्श पथि गच्छन्ती वसून् देवान् दिवौकसः ॥")

दिवोदासः, पुं, (दिवः स्वर्गात् दासो दानं यस्य ।) काशीराजः ; स चन्द्रवंशीयभीमरथराजपुत्त्रः । इति पद्मपुराणम् ॥
("अधीत्य चायुषो वेदमिन्द्राद्धन्वन्तरिः पुरा ।
आगत्य पृथिवीं काश्यां जातो बाहुजवेश्मनि ॥
नाम्ना तु सोऽभवत् ख्यातो दिवोदास इति क्षितौ ॥"
"वत्स ! वाराणसीं गच्छ त्वं विश्वेश्वरवल्लभाम् ॥
तत्र नाम्ना दिवोदासः काशिराजोऽस्ति बाहुजः ।
स हि धन्वन्तरिः साक्षादायुर्व्वेदविदांवरः ॥"
"अथ धन्वन्तरिं सर्व्वे वानप्रस्थाश्रमे स्थितम् ।
भगवन्तं सुरश्रेष्ठं मुनिभिर्बहुभिः स्तुतम् ॥
काशिराजं दिवोदासं तेऽपश्यन् विनयान्विताः ॥
स्वागतञ्च इति स्माह दिवोदासो यशोधनः ॥
कुशलं परिपप्रच्छ तथागमनकारणम् ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥
"अथ खलु भगवन्तममरवरमृषिगणपरिवृत-माश्रमस्थं काशिराजं दिवोदासं धन्वन्तरि-मौपधेनववैतरणौरभ्रपौष्कलावतकरवीर्य्यगोपुर-रक्षितसुश्रुतप्रभृतय ऊचुः ।"
इति सुश्रुते सूत्रस्थाने प्रथमेऽध्याये ॥)

दिवोद्भवा, स्त्री, (दिवे वने उद्भवो यस्याः ।) एला । इति शब्दार्थकल्पतरुः ॥ (दिवे स्वर्गे उद्भवो यस्य ।) दिविजाते, त्रि ॥

दिवौकाः, [स्] पुं, (दिवं स्वर्ग आकाशो वा ओको यस्य ।) देवः । इत्यमरः ।१।१।७॥ (यथा, महाभारते ।३।८४।११६।
"दिवौकसां पुष्करिणीं समासाद्य नराधिप ! ।
न दुर्गतिमवाप्नोति वाजिमेधञ्च विन्दति ॥")

दिव्यं, क्ली, (दिवे वने भवम् । दिव+यत् ।) लवङ्गम् । इति मेदिनी । ये, ३१ ॥ हरिचन्दनम् । इति राजनिर्घण्टः ॥ शपथः । तद्भेदा यथा, दिव्यतत्त्वे वृहस्पतिः ।
"घटोऽग्निरुदकञ्चैव विषं कोषश्च पञ्चमम् ।
षष्ठञ्च तण्डुलाः प्रोक्ताः सप्तमं तप्तमाषकम् ॥
अष्टमं फलमित्युक्तं नवमं धर्म्मजं स्मृतम् ।
दिव्यान्येतानि सर्व्वाणि निर्द्दिष्टानि स्वयम्भुवा ॥"
एषां विवरणं तत्तच्छब्दे केषाञ्चित् परीक्षाशब्दे च द्रष्टव्यम् ॥*॥ गङ्गाजलस्पर्शपूर्व्वकशपथस्तत्र मिथ्याकथने दोषश्च यथा,—
"ब्रह्मणो वचनं श्रुत्वा ज्ञानेशो ज्ञानिनांवरः ।
गङ्गातोयं करे कृत्वा स्वीकारञ्च चकार सः ॥
गङ्गातोयमुपस्पृश्य मिथ्या यदि वदेज्जनः ।
स याति कालसूत्रञ्च यावद्वै ब्रह्मणो वयः ॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम् ॥*॥
गङ्गाजलादिस्पर्शपूर्व्वकशपथे दोषो यथा ।
"तथा गङ्गोदकं ताम्रं गोमयं गोरजस्तथा ।
सत्यं वा यदि वासत्यं यदि दिव्यं करोति यः ॥
कर्त्ता च रौरवं याति तथा कारयिता प्रिये ! ।
उभयोः पुनरावृत्तिर्नरयोनिषु नास्ति वै ॥
तस्यास्ति पुनरावृत्तिर्यांघशूकरयोनिषु ।
दिव्यं कर्त्तुं कारयितुर्जपपूजा वृथा यथा ॥
गायत्त्रीरहितस्यापि नरकश्चोत्तरोत्तरम् ॥"
इति गायत्त्रीतन्त्रे पञ्चमपटलः ॥

दिव्यः, त्रि, (दिवि भवः । यत् ।) मनोज्ञः । दिवि भवः । इति मेदिनी । ये, ३१ ॥ (यथा, विष्णुपुराणे । १।९।१०४ ।
"दिव्यमाल्याम्बरधरा स्नाता भूषणभूषिता ।
पश्यतां सर्व्वदेवानां ययौ वक्षःस्थलं हरेः ॥")

दिव्यः, पुं, (दिवे वने भवः । दिव+यत् ।) यवः । गुग्गुलुः । इति राजनिर्घण्टः ॥ भावविशेषः । यथा,—
"शृणु भावत्रयं देवि ! दिव्यवीरपशुक्रमात् ।
दिव्यस्तु देववत् प्रायो वीरश्चोद्धतमानसः ॥
सत्यत्रेताद्वैपर्य्यन्तं दिव्यभावविनिर्णयः ।
त्रेताद्वापरपर्य्यन्तं वीरभाव इतीरितम् ॥
मद्यं मत्स्यं तथा मांसं मुद्रां मैथुनमेव च ।
श्मशानसाधनं भद्रे ! चितासाधनमेव च ॥
एतत्ते कथितं सर्व्वं दिव्यवीरमतं प्रिये ! ।
दिव्यवीरमतं नास्ति कलिकाले सुलोचने ! ॥"
इति कालीविलासतन्त्रम् ॥
नायकभेदः । यथा,—
"यत्तु तासां दिव्या अदिव्या दिव्यादिव्याभेदेन गणनया द्विपञ्चाशदधिकशतयुतसहस्रं भेदा भवन्ति । दिव्या इन्द्राण्यादयः । अदिव्या मालत्यादयः । दिव्यादिव्या द्रौपद्यादय इति वदन्ति तन्न तत्र अवस्थाभेदेनैव नायिकानां भेदात् जातिभेदेन भेदस्वीकारे अनन्तनायिकाणामिव नायकानामप्यानन्त्यं स्यात् । यथा हि इन्द्रादयो दिव्याः । अदिव्या माधवादयः । दिव्यादिव्या अर्ज्जुनादयः ।" इति रसमञ्जरी ॥ (सात्वतस्य पुत्त्राणामन्यतमः । यथा, भागवते । ९ । २४ । ६ ।
"भजमानो भजिर्दिव्यो वृष्णिर्देवावृधोऽन्धकः ।
सात्वतस्य सुताः सप्त महाभोजश्च मारिष ! ॥")

दिव्यकुण्डं, क्ली, (दिव्यं पुण्यप्रदत्वादत्युत्कृष्टं कुण्डमिति कर्म्मधारयः ।) कामरूपे चोभकशैलपूर्व्वभागस्थपुष्करिणीविशेषः । यथा,—
"तद्दक्षिणे महाशैलः चोभको नाम नामतः ।
तस्मिन् गिरौ शिलापृष्ठे वक्त्रे देवी व्यवस्थिता ॥
पञ्चपुष्करिणी नाम्ना पञ्चयोनिस्वरूपिणी ।
एकत्र पञ्चभिर्दुर्गायोनिभिः पञ्चवक्त्रकम् ॥
स्थिता रमयितुं तत्र नित्यमेव हिमाद्रिजा ।
तच्छैलपूर्व्वभागात्तु कान्ता नाम महानदी ॥
दक्षिणं सागरं याति प्रथमा चोत्तरस्रवा ।
दिव्यकुण्डं महाकुण्डं तच्छैलोपत्यकां गता ।
संस्थितस्तत्र स्नात्वा तु तां देवीं परिपूजयेत् ।
दिव्यकुण्डे नरः स्नात्वा पञ्चपुष्करिणीं शिवाम् ॥
यः पूजयेन्महाभागः स योनौ न हि जायते ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

दिव्यगन्धं, क्ली, (दिव्यो मनोहरो गन्धोऽस्य ।) लवङ्गम् । इति राजनिर्घण्टः ॥ (लवङ्गशब्देऽस्य विवरणं ज्ञातव्यम् ॥)

दिव्यगन्धः, पुं, (दिव्यः गन्धो यस्य ।) गन्धकः । इति राजनिर्घण्टः ॥ (गन्धकशब्देऽस्य विवृतिर्विज्ञेया ॥)

दिव्यगन्धा, स्त्री, (दिव्यो गन्धोऽस्याः ।) स्थूलैला । महाचञ्चुशाकः । इति राजनिर्घण्टः ॥

दिव्यगायनः, पुं, (दिव्यः स्वर्गीयः गायनः ।) गन्धर्व्वः । स्वर्गगायकः । इति शब्दरत्नावली ॥

दिव्यचक्षुः, [स्] त्रि, (दिव्यमलौकिकं चक्षुर्यस्य ।) ज्ञानचक्षुः । यथा, नीलकण्ठस्तोत्रे ।
"नमस्तुभ्यं विरूपाक्ष ! नमस्ते दिव्यचक्षुषे ।"
क्ली, ज्ञानात्मकचक्षुः । यथा,—
"न तु मां शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्यं ददामि ते चक्षुः पश्य मे योगमैश्वरम् ॥"
इति श्रीभगवद्गीतायाम् । ११ । ८ ॥ "अतो दिव्यमलौकिकं ज्ञानात्मकं चक्षुस्तुभ्यं ददामि ।" इति तट्टीकायां श्रीधरस्वामी ॥ * ॥ (दिव्यं स्वर्गीयं मनोज्ञं वा चक्षुः ।) स्वर्गीयचक्षुः । सुन्दरलोचनम् । उपचक्षुः । चस्मा इति भाषा । इति लोकप्रसिद्धम् ॥ (पुं, दिव्यं मनोज्ञं चक्षुर्यस्य । यद्वा, दिव्यं चक्षुर्ज्ञाननेत्रं यस्मात् । स्वर्णाभस्य सूत्रसर्व्वांगग्रहणमवलोकेश्वरस्य सर्व्वमसंहरणपरिज्ञानात् तथात्वम् ।) मर्कटः । इति शब्दमाला ॥ सुगन्धभेदः । त्रि, (दिव्ये आकाशभूते चक्षुषी यस्य ।) अन्धः । (दिव्ये सुन्दरे चक्षुषी यस्य ।) सुलोचनः । इति मेदिनी । से, ६८ ॥